("सत्त्व तस्यावृता धर्म्मा यस्यैते त्रय आवृताः ।
अनावृतास्तु यस्यैते सर्व्वास्तस्याफलाः क्रियाः" ॥
इति मनुः ।)

अनामकं, क्ली, (अनम् अन् + घञर्थे कः, अनं जीवनं आमयति, रोगग्रस्तं करोति, अम् + णिच् + ण्वुल् अनस्य आमकं षष्ठीतत्पुरुषः ।) अर्शोरोगः । इति शब्दरत्नावली ॥ मलमासे पुं । इति मलमासतत्त्वं ॥ दुर्नामके निर्नामके च त्रि ।

अनामयं, क्ली, (आ + अम् + भावे घञ्, आमं रुग्णावस्थां याति प्राप्नोत्यनेन, आम + या क, आमयस्य अभावः अव्ययीभावः ।) रोगाभावः आरोग्यं । इत्यमरः ॥
("ब्राह्मणं कुशलं पृच्छेत् क्षत्रबन्धुमनामयं" ।
इति मनुः ।) तद्विशिष्टे त्रि ॥

अनामा, [न्] पुं, (नास्ति ब्रह्मशिरश्छेदनसाधनतया अप्रशस्तं नाम यस्य सः । अनया अङ्गुल्या शिवेन ब्रह्मशिरश्छिन्नं । इति पुराणे ।) अनामिकाङ्गुली । इति शब्दरत्नावली ॥

अनामिका, स्त्री, (नास्ति ब्रह्मशिरश्छेदनसाधनतया प्रशस्तं नाम यस्याः सा । स्त्रियां डाप् ततः स्वार्थे कन् टाप् च ।) कनिष्ठामध्यमयोर्मध्यवर्त्यङ्गुली । इत्यमरः ॥ ("वक्त्रान्तानामिकाकेशनखरोमदन्तास्पृशः" । इति सुश्रुते ॥)

अनायत्तः, त्रि, (आ + यत् + क्तः, न आयत्तः नञ्समासः ।) अवशीभूतः । अनधीनः । यथा,—
"एतावज्जन्मसाफल्यं यदनायत्तवृत्तिता ।"
इति हितोपदेशः ॥

अनायासः, पुं, (आ + यस् + घञ् ततो नञ्समासः ।) अक्लेशः । तस्य लक्षणं यथा । बृहस्पतिः ॥
"शरीरं पीड्यते येन सुशुभेनापि कर्म्मणा ।
अत्यन्तं तन्न कुर्व्वीत अनायासः स उच्यते" ॥
इत्येकादशीतत्त्वं ॥ श्रमव्यतिरेकः । यत्नाभावः । यथा,—
"अनायासेन मरणं विना दैन्येन जीवनं ।
अनाराधितगोविन्दचरणस्य कथं भवेत्" ॥
इति प्रामाणिकाः ॥

अनायासकृतं, त्रि, (अनायासेन अक्लेशेन कृतं तृतीयातत्पुरुषः ।) अनायासेन यत् क्रियते स तत् । विना यत्नेन कृतं । तत्पर्य्यायः । फाण्टं २ । इत्यमरः ॥

अनारतं, क्ली, (आ + रम् + क्तः ततो नञ्समासः ।) अनवरतं । सततं । नित्यं । इत्यमरः ॥
("अनारतं तेन पदेषु लम्भिताः ।
विभज्य सम्यग्विनियोगसत्क्रियां" ॥
इति किरातार्ज्जुनीये ।)

अनारम्भः, पुं, (आ + रभ् + भावे घञ्, ततो नञ्समासः ।) आरम्भाभावः । यथा,—
"न कर्म्मणामनारम्भान्नैष्कर्म्म्यं पुरुषोऽश्नुते" ।
इति भगवद्गीता ॥

अनार्जवं, क्ली, (ऋजोर्भावः ऋजु + भावे अण्, ततो नञ्समासः ।) रोगः । इति राजनिर्घण्टः ॥ ऋजुताभावः ।

अनार्य्यः, त्रि, (ऋ + ण्यत्, न आर्य्यः श्रेष्ठः, नञ्समासः ।) अश्रेष्ठः । यथा,—
"अनार्य्यजुष्टमस्वर्ग्यमकीर्त्तिकरमर्ज्जुन" ।
इति श्रीभगवद्गीता ॥

अनार्य्यकं, क्ली, (नास्ति आर्य्यौ यत्र देशे तादृशार्य्यावर्त्तभिन्नदेशे भवं अनार्य्य + कन् ।) अगुरुकाष्ठं । इति राजनिर्घण्टः ॥

अनार्य्यजं, क्ली, (नास्ति आर्य्यौ यत्र देशे तादृशार्य्यावर्त्तभिन्नदेशे जायते यत्, अनार्य्य + जन् + ड, उपपदसमासः ।) अगुरु । इति हेमचन्द्रः ॥

अनार्य्यतिक्तः, पुं, (अनार्य्यप्रियश्चासौ तिक्तश्चेति शाकपार्थिवादिः ।) भूनिम्बः । इत्यमरः ॥ चिराता इति भाषा ।

अनालोचितः, त्रि, (न आलोचितः कर्त्तव्यतया अवधारितः ।) अकृतालोचनः । इतिकर्त्तव्यतयानवधारितः । अविवेचितः । यथा,—
"किं करोमि प्रतिज्ञा मे यदनालोचिता पुरा" ।
इति देवीमाहात्म्यं ॥

अनाविलः, त्रि, (न आविलः, नञ्समासः ।) आविलशून्यः । निर्म्मलः । इति हलायुधः ॥ (स्वच्छः, स्वास्थ्यकरः ।)
("पद्मगन्धि शिवं वारि सुखं शीतमनाविलं" ।
इति रामायणे ।
"जाङ्गलं शस्यसम्पन्नमार्य्यप्रायमनाविलम्" ।
इति मनुः ।)

अनावृतः, त्रि, (आ + वृ + कर्म्मणि क्तः न आवृतः, नञ्समासः ।) आवरणशून्यः । अनाच्छादितः । यथा । "अनावृतत्वाद्बहिरन्तरं न ते" । इति श्रीभागवतं ॥

अनावृष्टिः, स्त्री, (न आवृष्टिर्वर्षणं, नञ्समासः ।) ईतिविशेषः । वर्षणाभावः । इति स्मृतिः ॥ शुका इति भाषा ।
("अतिवृष्टिरनावृष्टिः शलभा मूषिकाः खगाः ।
प्रत्यासन्नाश्च राजानः षडेता ईतयः स्मृताः" ॥
इति प्रसिद्धम् ।)

अनाश्यः, त्रि, (णाशिनिमिते तु नश् + णिच् कर्म्मणि यत् ततो नञ्समासः ।) नाशायोग्यः । नशधातोर्ण्यति नञ्समासः ॥

अनासिकः, त्रि, (नास्ति नासिका यस्य सः ।) नासिकारहितः । तत्पर्य्यायः । विखः २ विखुः ३ विग्रः ४ । इति हेमचन्द्रः ॥

अनाहतं, क्ली, (आ + हन् + क्तः नास्ति आहतं छेदो यस्य तत् ।) तन्त्रोक्तषट्चक्रान्तर्गतचतुर्थचक्रं । तत्तु हृदयस्थकादिठान्तवर्णयुक्तोद्यदादित्यसन्निभदादशदलपद्माकारं । तन्मध्ये अयुतसूर्य्यसमप्रभशब्दब्रह्ममयबाणलिङ्गमस्ति । इति तन्त्रसारः ॥

अनाहतं, त्रि, (आ + हन् + भावे क्तः, न सन्ति आहतानि छेदक्षालनभोगा यस्य तत् ।) नूतनवस्त्रं । छेदक्षालनभोगरहितवस्त्रं । इत्यमरः ॥ अगुणितं । इत्यङ्कशास्त्रं ॥ अकृताघातं ॥ (अक्षतः । आघातरहितः । अक्षुण्णः । तन्त्रोक्तषट्चक्रान्तर्गतचतुर्थचक्रं, तत् तु हृदयस्थकादिठान्तवर्णयुक्तोद्यदादित्यसन्निभदादशदलपद्माकारं, तन्मध्ये अयुतसूर्य्यसमप्रभशब्दब्रह्ममयबाणलिङ्गमस्ति ।
"शब्दोब्रह्ममयः शब्दोऽनाहतो यत्र दृश्यते ।
अनाहताख्यं तत्पद्मं मुनिभिः परिकीर्त्तितं" ॥

अनाहारः, पुं, (आ + हृ + भावे घञ् ततो नञ्समासः ।) भोजनाभावः । यथा,—
"ऋतावनाहारतया भयेनेति" चरकः ॥

अनाहूतः, त्रि, (आ + ह्वे + कर्म्मणि क्तः ततो नञ्समासः ।) अकृताह्वानः । अनिमन्त्रितः । यथा,—
"अनाहूतैरेत्य प्रचुरगुणलोभेन भवतः" ।
इत्युद्भटः ॥ क्तसमध्योऽपि यथा—
"अनाहूता अप्यभियान्ति सौहृदं" ।
इति श्रीभागवतं ॥

अनिगीर्णः, त्रि, (नि + गॄ + क्तः ततो नञ्समासः ।) अनुक्तः । यथा,—
"विषयस्यानिगीर्णस्यान्यतादात्म्यप्रतीतिकृत्" ।
इति साहित्यदर्पणं ॥

अनिच्छुः, त्रि, (इष् + कर्त्तरि उ विन्दुरिच्छुरिति सूत्रेण निपातनात् साधु ।) अनिच्छाविशिष्टः । अनाकाङ्क्षी । अस्पृहः । इच्छतीति इच्छुः ततो नञ्समासः ॥

अनित्यः, त्रि, (नि + त्यप् ततो नञ्समासः ।) नश्वरः । अस्थायी । जन्यवस्तु । यथा,—
"धर्म्मो नित्यः सुखदुःखेऽप्यनित्ये ।
जीवो नित्यो हेतुरस्याप्यनित्यः" ।
इति महाभारते भारतसावित्री ॥

अनिन्दितः, त्रि, (निदि + कर्म्मणि क्तः ततो नञ्समासः ।) निन्दारहितः । अगर्हितः । तत्पर्य्यायः । प्रणाय्यः २ साधुः ३ । इति त्रिकाण्डशेषः ॥
("अनिन्दितैः स्त्रीविवाहैरनिन्द्या भवति प्रजा ।
निन्दितैर्निन्दिता नृणां तस्मान्निन्द्यान् विवर्जयेत्" ॥
इति मनुः ॥)

अनिपुणः, त्रि, (न निपुणः पटुः नञ्समासः ।) अप्रवीणः । अविज्ञः । अपटुः । यथा,—
"यः शास्त्रादिष्वनिपुणः श्रद्धावान् स तु मध्यमः" ।
इति भक्तिरसामृतसिन्धुः ॥

अनिमिषः, पुं, स्त्री, (नास्ति निमिषः निमेषः चक्षुःस्पन्दनं यस्य सः ।) देवता । मत्स्यः । इत्यमरः ॥ (निमेषरहितः । स्थिरदृष्टिः । सावधानः । अप्रमत्तः ।
"सुरेषु नापश्यदवेक्षताक्ष्णो-
ऽपि निमेषं निजसम्मुखे सति" ।
इति नैषधे ।)

अनिमिषाचार्य्यः, पुं, (अनिमिषाणां देवानां आचार्य्यः गुरुः षष्ठीतत् ।) बृहस्पतिः । देवगुरुः । इति शब्दरत्नावली ॥

अनिमेषः, पुं, (नास्ति निमेषः चक्षुःस्पन्दनं यस्य सः ।) देवता । मत्स्यः । इति हेमचन्द्रः ॥

अनियतं, त्रि, (नि + यम् + क्तः, न नियतं नञ्समासः ।) अनित्यं । अस्थायि । यथा,—
"रत्यादयोऽप्यनियते रसे स्युर्व्यभिचारिणः" ।